# Devaih Kritam Skanda Stotram

# देवैः कृतं स्कन्दस्तोत्रम्

## Document Information

Text title : Devaih Kritam Skanda Stotram

File name : devaiHkRRitaMskandastotram.itx

Category : subrahmanya, matsyapurANa, stotra

Location : doc_subrahmanya

Proofread by : PSA Easwaran

Description/comments : matsyapurANa | adhyAya 159/13-17||

Latest update : September 27, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskcript**.

September 27, 2024

*sanskritdocuments.org*

# देवैः कृतं स्कन्दस्तोत्रम्

देवा ऊचुः ।
नमः कुमाराय महाप्रभाय स्कन्दाय च स्कन्दितदानवाय ।
नवार्कविद्युद्द्युतये नमोऽस्तु ते नमोऽस्तु ते षण्मुख कामरूप ॥ १३॥

पिनद्धनानाभरणाय भर्त्रे नमो रणे दानवदारणाय ।
नमोऽस्तु तेऽर्कप्रतिमप्रभाय नमोऽस्तु गुह्याय गुहाय तुभ्यम् ॥ १४॥

नमोऽस्तु त्रैलोक्यभयापहाय नमोऽस्तु ते बाल कृपापराय ।
नमो विशालामललोचनाय नमो विशाखाय महाव्रताय ॥ १५॥

नमो नमस्तेऽस्तु मनोहराय नमो नमस्तेऽस्तु रणोत्कटाय ।
नमो मयूरोज्ज्वलवाहनाय नमोऽस्तु केयूरधराय तुभ्यम् ॥ १६॥

नमो धृतोदग्रपताकिने नमो नमः प्रभावप्रणताय तेऽस्तु ।
नमस्ते नमस्ते वरवीर्यशालिने कृपापरो नो भव भव्यमूर्ते ॥ १७॥

इति मत्स्यपुराणे एकोनषष्ट्यधिकशततमाध्यायान्तर्गतं
देवैः कृतं स्कन्दस्तोत्रं समाप्तम् ।

मत्स्यपुराण । अध्याय १५९/१३-१७॥

matsyapurANa . adhyAya 159/13-17..

Proofread by PSA Easwaran

Please send corrections to *sanskrit@cheerful.com*